सं० १५३२ वर्षे चैत्र वदि २ गुरौ श्री श्रीमाल ज्ञा० सं० जोगा भा० जीवाणि सं० गोला भा० कर्मा पु० नरबदेन श्री श्रेयांसनाथ बिंबं कारितं श्री पूर्णिमा पक्षीय श्री साधु सुंदर सूरीणामुपदेशेन प्रतिष्ठितं विधिना वलहरा ।

(562)

सं० १५३५ वर्षे फागुण सुदि ३ दिने श्री उकेशवंश भ० गोत्रे सा० नीवा भार्या पूजी सा० पूना श्रावकेण भ्रातृ सजेहण मा० अंबा परिवार युतेन श्री संभवनाथ बिंबं कारितं प्रतिष्ठित श्री खरतर गच्छे श्रीजिन भद्र सूरि पट्टे श्री जिनचंद्र सूरिभिः ॥

(563)

संवत १५४७ वर्षे मा० वदि ८ दिने प्राग्वाट ज्ञातीय व्य० रूपा भा० देपू पुः मेरा भा० हीरू श्रेयोर्थं श्री वासुपूज्य बिंबं प्रतिष्ठितं श्री सूरिभिः ।

(564)

॥ संवत १५५७ वर्षे वैशाष सुदि ३ दिने मंगलवासरे उ० ज्ञातीय वेंछाच गोत्र मा० षीमा पु० जालू नारिगदे अगस---श्रेयोर्थं श्रीशांतिनाथ विंवं का० प्र० श्रीसंडेरग गच्छे श्रीशांति सूरिभिः तत्प-श्रीर-सूरिभिः।

(565)

सं० १५५९ (?) वर्षे आषाड सु० १० सूराणा गोत्रे स० शिवराज भा० सोतादे पुत्र स० हेमराज भार्या हेमसिरी पु० पूजा काजा नरदेव श्री पार्श्वनाथ विंवं कारितं प्र० श्रीधर्म घोष गच्छे भ० श्रीपद्मानंद सूरि पट्टे नंदिवर्द्धन सूरिभिः।

(566)

सं० १५५९ वर्षे आषाढ सुदि १० आईचणाग गोत्रे तेजाणी शाषायां सा० सुरजन भा० सूहवदे पु० सहस मल्लेन भा० शीतादे पु० पाडा ठाकुर भा० द्रौपदी पौ० कशा पीघा श्रीवंत युतेनात्मपुण्यार्थं श्रीसुमतिनाथ विंवं कारितं प्र० श्रीउपकेशगच्छे भ० श्रीदेव-गुप्त सूरिभिः ॥ श्रीः ॥

(567)

सं० १५६७ वर्षे श्री माह सुदि ५ बुधे गोठि गोत्रे सा० ---तत्पु० पहराज तत्पुत्र राठा---त्यादि परिवार युतेन सुविधि नाथ विंवं का० प्र० खरतरगच्छे श्रीजिन-चन्द्र सूरिभिः।

(568)

संवत १५७९ वर्षे आषाढ़ सुदि १३ दिने रविवारे श्री फसला गोत्रे मं० सधारण पुत्र रत्न मं० माणिक भार्या माणिकदे पुत्र मूलाकेन पुत्रपौत्रादि परिवृतेन श्री: पार्श्वनाथ बिंबं कारितं प्र० श्रीखरतरगच्छे श्रीजिनहंस सूरिभिः श्रीपत्तन महानगरे।

(569)

सं० १९०४ वर्षे पौष मासे शुक्ल पक्षे पूर्णिमायां तिथौ श्रीअजमेर पूर्यां श्री चतुर्विंशति जिनमातृका पट्ट लुनिया गोत्रेन सा० पृथिराजेन का० प्र० श्रीवृहत् खरतरगच्छाधीश्वर जंगमयुगप्रधान भ० श्रीजिन सौभाग्य सूरिभिः विजयराज्ये।

श्रीदादाजीके छतरिके पास मन्दिरमें।

(570)

सं० १५३५ वर्षे आषाढ़ सुदि ६ शुक्रे बड़नगर वास्तव्य उकेशज्ञातीय सा० साजण भार्या तारू पुत्र सा० लषाकेन भार्या लीलादे प्रमुख कुटुम्बयुतेन स्वश्रेयसे श्रीशांतिनाथ बिंबं कारितं प्रतिष्ठितं श्री तपागच्छनायक श्री लक्ष्मीसागर सूरिभिः॥ पं० पुण्यनन्दन गणीनामुपदेशेन।

जयपूर।

यति श्यामलालजी के पासकी मूर्त्तियों पर

(571)

सं० १३-- वर्षे माघ सुदि १३ सोमे श्रीकाष्ठासंघ श्रीलाड वागड (?) गण श्रीमन्-- मुरूपदेसेन हुंवउ ज्ञातीय व्य० वाहड भार्या लाछि सुत षीमा भार्या राजलदेथि श्रेयोर्थं सुत दिवा भार्या संभव देवि नित्यं प्रणमति।

(572)

सं० १४३९ वर्षे पौष ९ सोमे श्रीब्रह्माणगच्छे श्रीश्रीमा० --- मायलदे पु० सामलेन श्रीशांतिनाथ विंबं कारितं प्रतिष्ठितं श्रीबुद्धिसागर सूरिभिः ॥ श्री ॥

(573)

सं० १५१५ वर्षे फागुण शुदि ४ शुक्रवारे। ओसवाल ज्ञातीय बच्छस गोत्रे सा० धीना भार्या फाई पु० देवा पद्मा मना वाला हरपाल धर्मसी आत्मपुण्यार्थं श्रीधर्मनाथ विंबं कारितं श्रीम० तपागच्छे ---- ।

(574)

सं० १५२१ वर्षे ज्येष्ट सुदि १३ गुरौ रणसण वासि श्रीश्रीमाल ज्ञातीय श्रे० धर्मा भा० धर्मादे सुत भोजाकेन भा० भली प्रमुख कुटुम्बयुतेन स्वश्रेयसे श्रीशांतिनाथ चतुर्विंशति पट्टः कारितः प्रतिष्ठितः श्री सुविहत सूरिभिः ॥ श्रीरस्तु ॥

याति किसनचन्दजी के पासकी मूर्त्तियों पर ।

(575)

सं० १३१८ फागुन--- गेहलडा गोत्रे वटदेव पुत्र विसल पुत्र लषमणेन मातृ वीरी श्रेयोर्थं श्री पार्श्वनाथ विंवं कारितं प्र० श्री भावदेव सूरिभिः ।

(576)

सं० १५०५ वर्षे माह वदि ९ शनौ श्री---गच्छे--- जलहर गोत्रे सा० लुणा भा० लुणादे पुत्र पविन पाल्हा खानाभि पितृमातृ श्रेयोर्थं श्री संभवनाथ विंवं कारि० प्र० ---।

(577)

सं० १५०८ वर्षे ज्येष्ठ सुदि १० श्रीमाल ज्ञातौ भांडावत गोत्रे सा० भोजा भार्या खासु पुत्र नेना भार्या फुला श्री धर्मनाथ विंवं कारितं श्री पल्लि गच्छे -----।

(578)

संवत १५०९ वर्षे ऊएस वंशे सा० हऊदा भार्या आलूणादे पुत्र केन्हाकेन श्री अंचल गच्छेश श्री जय केशरि सूरिणां उपदेशेन पितृ श्रेयोर्थं श्री आदिनाथ विंवं कारितं ।

(579)

सं० १५३२ वर्षे ज्ये० व० ३ रवौ वणागीआ गोत्रे सा० वादी भ० पोमाइ सु० तिउण श्रेयोर्थं सा० सावउन श्रोवंत साजण प्र० कुटुंव युतेन श्री पद्मप्रभ विंवं कारितं रोद्रपल्लिय गच्छे श्रीदेव सुंदर सूरि पट्टे प्रतिष्ठितं श्री गुण सुंदर सूरिभिः ।

(580)

संवत १५५९ वर्षे माघ सुदि १५ गुरौ ओसवाल ज्ञातीय सा० हासा पुत्र हरिचंदेन भा० हीरादे पुत्र पुना धूनादि कुटुंब युतेन गहिलडा गोत्रे श्री सुविधिनाथ विंबं का० प्र० तपागच्छे श्री हेम विमल सूरिभिः नागपुरे।

(581)

संवत १६७४ वर्षे माघ वदि २ दिने गुरु पुष्ययोगे ओसवाल ज्ञातीय चोरडिया गोत्रे स० सिघा भार्या नवलादे तत्पुत्र स० भैरवदास भार्या भर्मादे नाम्न्या श्री नमिनाथ विंबं कारितं प्रतिष्ठितं तपा गच्छे भट्टारक श्री विजयदेव सूरिभिः।

(582)

सं० १६८८ व० माघ व० १ गुरौ ----हस गोत्रिय सा० वंजाकेन --- सुविधिनाथ विं० गृहीत घ० ट० श्रीतपा गच्छे श्री विजयदेव आचार्य श्री विजयसिंह सूरि प्रति०।

जोधपुर।

यह मारवाड़की राजधानी एक प्रसिद्ध स्थान है।

श्रीमहावीर स्वामीका मन्दिर (जुनी मंडि)

धातुओंके मूर्त्ति पर।

(583)

सं० १४५९ वर्षे माह सुदि ११ स० हाप-सीह पुत्रो सषदे- केन पुत्र पूजा काजा युतेन पित्र श्रेयोर्थं श्री आदिनाथ विंबं कारितं प्रतिष्ठितं श्री जिनराज सूरिभिः।

(584)

सं० १४८० वर्षे वैशाष सु० ३ घांघगोत्रे सा० मोल्हा पुत्रेण सा० सांचडेन स्वपुत्रेण भार्या खिरियादे श्रेयसे श्री आदिनाथ विंबं कारितं प्र० श्री विद्यासागर सूरिभिः ॥ श्री ॥

(585)

सं० १५०१ प्रा० ज्ञा० डोडा भा० राणी सुत सुपाकेन भा० सरसू पुत्र साजणादि युतेन श्री अजितनाथ विंबं कारितं प्रतिष्ठितं श्री सूरिभिः ।

(586)

सं० १५०३ आषा० सु० ९ शु० राउ खावरही गोत्रे सा० महिराज भा० सीता पु० पीद भा० लोली पु० कीडा देताभ्यां युतेन श्री धर्मनाथ विंबं कारापितं श्री - - र्षि गच्छे श्री जयसिंह सूरि पट्टे श्रीजय शेषर सूरिभिः तपा पक्ष ।

(587)

सं० १५०३ वर्षे मार्ग वदि २ खुचंती भंडारी गोत्रे सा० सोमा भा० सोम श्री पुत्र हीराकेन आत्म० श्री श्रेयांस विंबं का० प्र० श्री धर्म घोष गच्छे श्री पद्म शेषर सूरि पट्टे श्री विजय नरेन्द्र सूरिभिः ॥

(588)

सं० १५१७ वर्षे चैत्र सु० १३ गुरौ उप० ज्ञा० म० नूणा भा० माणिकदे पु० सांडा भा० वाल्हणदे पुत्र षेतसि वास० प्रा० मा० श्र० श्री सुमतिनाथ विंबं का० प्र० ब्रह्माणीया ग० श्री उदय प्रभ सूरिभिः ।

(589)

सं० १५२२ वर्षे वैशाष सु० ३ नना ज्ञा०श्रे० जइता भा० षरि पुत्र गेला भा० वाली नाम्न्या पुत्र अमरसी भा० तिलू सजन कवेला मातृ दूसी ज्येष्टमाला प्रमुख कुटुंब युतया स्व श्रेयोर्थं श्री विमलनाथ विंबं का० प्र० तपा श्री लक्ष्मीसागर सूरिभिः ॥ श्री ॥

(590)

✓ सं० १५२४ वै० शु० ३ श्री मूलसंघे सरस्वती गच्छे श्रीकुंदकुंदाचार्य भ० पद्मनंदि तत्प० भ० श्रीसकल कीर्त्ति तत्प० भ० श्री विमल कीर्त्या श्री शांतिनाथ विंबं प्रतिष्ठितं। श्रो जे संग भा० मरगादे सु० तेजा टमकू सु० सिवदाय।

(591)

सं० १५२७ वर्षे माह सु० ९ बुधे श्री --- गोत्रे सा० भादा भा० सावलदे पु० मेलाकेन भा० मालूणदे पुत्र भींभा कान्हा रूपादि युतेन स्व श्रेयसे श्री आदिनाथ विंबं कारितं प्रतिष्ठितं जिनदेव सूरि पट्टे श्रीमत् श्री भावदेव सूरिः।

(592)

सं० १५३२ वर्षे वैशाष वदि ५ रवौ उप० ज्ञा० गो० उरजण भा० राउं सु० भीदा भा० भावलदे सु० गारगा वरजा युतेन आत्म० श्री सुमतिनाथ विंबं का० प्र० श्री जीरापलीय गच्छे श्री उदयचन्द्र सूरि पट्टे श्रीसागर नांद सूरिभिः शुभं भवतु

(593)

सं० १५३५ श्री मूलसंघे भ० श्री भुवन कीर्त्ति स्त० भ० श्री ज्ञान भूषण गुरूपदेशे--

(594)

सं० १५५१ वर्षे फागुण मासे शुक्लपक्षे ३ बुध वासरे साह चांपा भार्या मेघू डुंगर भार्या चांदू पु० डाहा भा० मालू श्री नमिनाथ विंबं कारितं प्रतिष्ठितं पूर्णिमा पक्षिक छोली वाल गच्छे भट्टारिक श्री विजय राज सूरिभिः ॥ श्री ॥

(595)

सं० १५६३ वर्षे माह सुदि १५ गुरौ प्रग्वाट ज्ञा० सा० कला भा० भमणादे पु० सदो --- पु० घना --- सहितेन आत्म पुण्यार्थे श्रीसुमति विंबं का० प्र० पूणिमाक गच्छे ---सागर सूरि---।

(596)

सं० १५६५ वर्षे चैत्र सु० १५ गुरौ उप० भंडारी गोत्रे सा० नरा भा० नारिंगदे पु० तोली भा० लाछलदे पु० चिजा रूपा कूणा विजा भा० बीफलदे पु० नाम्ना डामर द्वि० भा० वालादे पु० खेतसी जीवा स्वकुटुंबेन पितृ निमित्त श्री सुमतिनाथ विंबं कारितं प्र० श्री संडेर गच्छे भ० श्री शांति सूरिभिः।

(597)

सं० १५६५ वर्षे माह सुदि ८ रवौ श्री उपकेश वंशे वि० सांडा भार्या धम्माई सुत बीसा सूरा भार्या लाली द्वि० भार्या अरधाई धर्म्म श्रेयसे श्री शीतलनाथ विंबं प्रति० सिद्धांती गच्छे श्रीदेव सुंदर सूरिभिः प्र०।

(598)

॥ ॐ संवत १५६५ वर्षे वैशाष वदि १३ रवौ ढेढीया ग्रामे श्री उएसवंशे सं० चीदा भार्या धरणू पुत्र सं० तोला सुश्रावकेण भा० नीनू पुत्र सा० राणा सा० लषमण भ्रातृ

सा० आसा प्रमुख कुटुंब सहितेन स्वश्रेयोर्थं श्री अंचल गच्छेश श्री भाव सागर सूरीणा मुपदेशेन श्री अजितनाथ मूलनायके चतुर्विंशति जिन पट्ट कारितः प्रतिष्ठितः श्रीसंघेन।

(569)

सं० १५७० वर्षे आ० सु० ३ सोमे ओसवाल ज्ञातीय चंडलिआ गोत्रे सा० सारिग पुत्र कालू भा० हामी पु० हासा देवा गणाया भार्या दमाई पु० साह विमलदास सा० हरवलदास सा० विमलदास भा० सोनाई पु० सुन्दर वच्छ रिषभदास भार्या अमरादे सुत अमरदत्त पूर्वत भु० श्री सुविधिनाथ विंवं कारितं प्र० श्रीमलधार गच्छे भ० श्री गुण सागर सूरिपट्टे श्री लक्ष्मीसागर सूरि प्रतिष्ठितः॥

(600)

सं० १८२१ मि० वै० सुदी ३ श्री पार्श्वजिन–भ० श्री जिन लाभ सू० यति हीरानंद करापितं।

देविजीके मूर्त्तिपर।

(४ भूजा + सर्प छत्र)

(601)

सं० १४७२ वर्षे ज्येष्ठ वदि १२ सोमे वीजापूर वास्तव्य नागर ज्ञातीय ठा० भवासुत धरणाकेन कुटुंब सम-- श्रेयोर्थं देवी वेङ्करुठा० रूपं प्रतिष्ठापितं।

(602)

सं० १५५४ माह सुदि ५ दिने उ० ज्ञातीय मंडोवरा गोत्रे सा० पासवीर पु० सा० सूरा भा० सूहवदे पु० सा० श्रीकरण सा० शिवकरण सा० विजपाल श्रा० सूहवदे आत्मपुण्यार्थं श्री शांतिनाथ विंवं का० प्र० श्रीधर्म्म घोष गच्छे भ० श्रीपुण्यवर्द्धन सूरिभिः।

(603)

संवत १५७९ वर्षे वैशाख सुदि ७ बुधे उशवाल ज्ञातीय वृद्धशाषीय पोसालेचा गोत्रे सा० षीमा भा० अधी-पु० सा० श्रीवंत भा० सोनाई पु० सकल युतेन स्वश्रेयसे श्रीपार्श्वनाथ विंवं का० श्री कोरंट गच्छे श्री कक्क सूरिभिः ॥ श्री ॥

(604)

स्वस्ति श्रीः ॥ सं० १५९८ वर्षात्पौष वदि ११ सोमे उकेश वंशे व्य० परवत भा० फदकु तत्पुत्र व्य० जयता भा० अहिवदे पु० व्य० श्री ५ सपरिवारेण सोक्क विहान कर्मा निज --- परिवार श्रेयोर्थं आदिनाथ विंवं कारितं प्र० श्री पूर्णिमा पक्षे भीमपल्लीय भ० श्री मुनिचन्द्र सूरिपट्टे श्री विनयचंद्र सूरिणामुपदेशेनेति भद्रं ।

(605)

ॐ संवत १६३८ वर्षे माघ सुदि १३ सोमे श्री स्तंभ तीर्थ वास्तव्य सोनी मनजी भार्या मोहणदे सुत सोनी मंगलदास नाम्ना श्री श्री माल ज्ञातीय श्री अजितनाथ विंवं कारापितं तपागच्छे श्री हीर विजय सूरीश्वरै प्रतिष्ठितं ।

श्री केसरियानाथजी का मंदिर—मोती चौक ।

(606)

ॐ ॥ संवत १२३९ द्विः वैशाख सुदि ६ शुक्रे पल्यपद्र वास्तव्य श्री ति-नि गच्छे भ० श्री देवाचार्य सत्क श्री नवत्सार सुत-ष्टे-गुण स्वपत्नी सलखणायाः श्रेयोर्थं श्री पार्श्वनाथ प्रतिमा कारिता प्रतिष्ठिता श्री वुद्धि सागराचार्य्यैः ॥

(607)

सं० १४५८ वर्षे माह सुदि ५ लोढा गोत्रे सा० देवसींह भार्या देलूणदे पुत्र रेडा भार्या रूपादे पुत्र सा० सालू सायराभ्यां पितृ मातृ पुण्यार्थे श्री आदिनाथ विंबं का० प्रति० श्री धर्मघोष गच्छे श्री मलयचन्द्र सूरिभिः।

(608)

सं० १५१३ वर्षे पोष वदि ४ शुक्रे श्रीमाल ज्ञा० श्रे० संग भा० श्रेयादे सु० महिराजेन पितृ मातृ भ्रातृ समधर सारंगा भ्रो मान मित्रं स्वात्म श्रेयसे श्रीश्री सुमतिनाथ विंबं पंचतीर्थी कारापिता प्रतिष्ठितं पिप्पल गच्छे भ० श्री गुण रत्न सूरिभिः गंधारवास्तव्य॥

(609)

सं० १५२४ चैत्रवदि ५ -- ठ माणिक भा० वारूदे-श्री विमलकीर्त्ति—धर्मनाथ विंबं प्र० वाई तपदे जा० काल्हा --।

(610)

सं० १५२८ वर्षे वैशाख वदि ६ दिने सोमे उकेश वंश कुकंट शाखायां ठ्यै० तोला भा० चेतलदे पुत्र सदस मल्लेन तील्हादि पुत्र पौत्रादि युतेन स्व श्रेयोर्थे श्री सुमतिनाथ विंबं कारितं प्रतिष्ठितं श्री खरतर गच्छे श्री जिनचंद्र सूरिभिः।

(611)

सं० १५७२ वर्षे फागुण सु० ९ मं० भंडारी गोत्रे सा० तोला भा० पलाछदे पुत्र सा० विद्रा सा० परूपा सा० कूपा भा० करमादे पु० माता - पुण्यार्थे श्री सुमतिनाथ विंबं कारितं प्रतिष्ठितं श्री संडेर गच्छे भ० श्री शांति सूरिभिः।

(612)

सं० १८९३ ना मा। सु० १० बु०। श्री जोधपूर वास्तव्य श्री ओसवाल ज्ञातीय वृद्ध शाखायां संघ माणक चंद तेउ स्वश्रेयार्थं श्री चतुर्विंशति जिन विंवस्य भरापोतं।

(613)

सिद्ध चक्रके पट्ट पर।

श्री सिद्धचक्रो लिखतो मया वै। भट्टारकीयेन सुयंत्रराजः॥ श्री सुन्दराणां किल शिष्यकेन। स्वरूपचंद्रेण सदऽर्थ सिद्धैयः॥ १॥ श्री मल्लागपुरे रम्ये चंद्रवेदाऽष्ट भूमिते। अब्दे वैशाखमासस्य तृतियायां सिते दले॥ २॥

श्री मुनिसुव्रतस्वामीजी का मन्दिर।

(614)

सं० १४२३ वर्षे फागुन शु० १ श्री श्री० ज्ञा० व्य० काला भा० काल्हणदे सु०--पद्म प्रभु बिं० श्री पू० श्री उदयाणंद सू० प्र०।

(615)

सं० १४४१ वर्षे वैशाख वदि १२ दिने नाहर वंशालंकारेण सा० चड़सिंह पुत्रेण भ्रातृ सा० सलकेन सखणादि युतेन श्री पार्श्वनाथ विंबं कारितं प्रतिष्ठितं श्री जिनराज सूरिभिः श्री खरतर गच्छेशः॥

(616)

सं० १४९९ वर्षे फागुण वदि २ गुरौ श्री तावडार गच्छे पांढरा गोत्रे जेसा भा० जस-मादे पु० तोजा भा० वापू पुठीयलमेदा सह० श्री शांतिनाथ वि० प्र० का० श्री कीर्त्ति का चार्य स० श्री वीर सूरिभिः ।

(617)

सं० १५३६ वर्षे फा० सुदि ३ रवौ उके० पदे दोसो गोत्रे० सा० सीरंग -- पुत्र सा० डूडकेन भा० दाडिमदे पुत्र कीता तेजादि परिवारयुत श्री धर्मनाथ विंबं कारितं श्रेयसे प्रतिष्ठितं श्री खरतर गच्छे श्री जिनभद्र सूरि पट्टे श्री जिनचन्द्र सूरि श्री जिन समुद्र सूरिभिः श्री पद्म प्रभ विंवं ।

(618)

सं० १५८२ वर्षे जे० सुदि १० शुक्रे वडतप श्री धन रतन सूरि --- ।

श्री धर्मनाथजी का मन्दिर ।

(619)

सं० १४९३ जेठ वदि ३ मंगले उप० ज्ञा० पावेचा गोत्रे सा० वीरा भा० वील्हणदे पुत्र कुंभाकेन भा० कामलदे युतेन स्वश्रे० विमल विंवं का० प्र० वृहत गच्छे देवाचार्यान्वये श्री हेमचन्द्र सूरिभिः ॥ छ ॥

(620)

सं० १५०३ वर्षे डोसी-धर्माकस्य पुण्यार्थं दो० वूछा पुत्र संग्राम श्रावकेण कारितः श्री श्रेयांस विंवं प्रतिष्ठितं श्री जिनभद्र सूरिभिः श्री खरतर गच्छे ।

(621)

सं० १५०४ वर्षे वै० शु० ३ प्राग्वाट ज्ञा० श्रे० भंडारी शाणी सुत श्रे० षीमसी सा-पाभ्यां भा० मदीखतजता मालादि कुटुंवयुताभ्यां स्वश्रेयसे श्री मुनि सुव्रत स्वामि विंवं का० प्र० तपा श्री सोम सुन्दर सूरि शिष्य श्री जयचंद्र सूरिभिः धार वास्तव्यः शुभं भवतु ॥

(622)

सं० १५०७ वर्षे मार्गसिर वदि २ गुरौ उपकेश वंशे जारंउडा गोत्रे सा० षिमपालात्मज सा० गिरराज पुत्र सहदेवो भ० लोला समदा सहितेन मातृ गवरदे पूजार्थं श्री नमि विं० का० प्र० तपा भट्टारक श्री हेमहंस सूरिभिः ॥

(623)

सं० १५१२ वर्षे फागुन सु० १२ आहतणा (आईचणा ?) गोत्रे सा० धना भा० रूपी पु० मोकल भा० माहणदे पु० हासादि युतेन स्वमाकल श्रेयसे श्री संभवनाथ विंवं का० उकेश गच्छे श्री सिद्धाचार्य संताने प्र० भ० श्री कक्क सूरिभिः ।

(624)

सं० १५२५ वर्षे दिवसा वासे श्रीमाल ज्ञातीय सा० दशरथ भा० सामिनी सुत माना केन भा० राना भ्रातृसालू भा० सोढी कुटुंवयुतेन स्वश्रेयोर्थं श्री शांतिनाथ विंवं का० प्रतिष्ठितं तपा गच्छे श्री लक्ष्मी सागर सूरिभिः नलुरीया गोत्रः ॥

(625)

सं० १५२८ वर्षे वैशाख वदि ६ चंद्रे उपकेश ज्ञातौ आदित्यनाग गोत्रे सा० तेजा पु० जासो-भा० जयसिरि पु० सायर भा० मेहिणि नाम्न्या पु० गुणा पूना, सहज सहितया

स्वपुण्यार्थं श्री संभवनाथ विंवं का० प्र० उपकेश ग० कुक्कुदाचार्य स० श्री देव गुप्त सूरिभिः।

(626)

सं० १५६३ वर्षे माघ सु० १५ गुरौ उ० विदाणा गोत्रे सा० रतना भा० रतनादे पु० रामा० रूपा स० पि० श्री कुंथनाथ विंवं का० प्र० श्री संडेर गच्छे श्री शांति सूरिभिः श्रेयात् ॥

दिनाजपूर।

श्री मूलनायकजीके विंवं पर।

(627)

--- सु० ४ श्री चन्द्र प्रभ जिन विंवं संघेन कारितं प्रतिष्ठितं च ॥ श्रीजिनचन्द्र सूरिभिः ॥ श्री विक्रमपूरे।

धातुके मूर्त्तियों पर।

(628)

संवत १४४७ वर्षे फागुण सुदि ९ सोमे श्री अंचल गच्छे श्री मेरुतुंग सूरीणामुपदेशेन शानापति ज्ञातीय मारू ठ० हरिपाल पत्नि सूहव सुत मा० देपालेन श्री महावीर विंवं कारितं। प्रतिष्ठितंच श्री सूरिभिः ॥

(629)

सं० १५१५ वर्षे फागुण वदि ५ गुरौ श्री श्रीमाल ज्ञातीय लघुशाखायां श्रे० अर्जन भा० मंदोअरि पितृ मातृ श्रेयसे सुत गोईदेन भा० माकू पुत्र मेहाजल सहितेन श्री कुंथनाथ

बिंबं कारितं पूर्णिमा पक्षे भीमपल्लीय भट्टारक श्रीजयचंद्र सूरीणामुपदेशेन प्रतिष्ठितं ॥ श्रीः ॥ छ ॥

(630)

सं० १५३१ वर्षे माघ वदि ८ सोमे श्री श्रीमाल ज्ञातीय श्रे० भरमा भार्या भरमादे पुत्र आसा भार्या वईरामति नाम्न्या स्वभर्त्त पुण्यार्थं आत्म श्रेयोर्थं श्री जीवित स्वामि श्री सुविधिनाथ चतुर्विंशति पट्ट का० प्र० श्री धर्मसागर सूरिभिः ।

(631)

सं० १६२७ वर्षे वैशाख वदि १० श्री मूलसंघे भ० श्री सुमति कीर्त्ति गुरूपदेशात् का० जो देवसुत को० सिंघा सु० धर्मदास हरिदास अनंतनाथ नित्यं प्रणमति ।

(632)

सं० १८४४ रा मिती अषाढ़ सुदी १३ श्री नेमनाथजी विं० ॥ छ ॥

दादाजी के चरण पर ।

(633)

सं० १८९८ मिति ज्येष्ठ कृष्ण ८ तिथौ बुधवारे । भ । श्रीजिनचद्र सूरिभि प्रतिष्ठितं ॥ भ । श्री जिनकुशल सूरिजो पादुका ॥ भ । श्री जिनदत्त सूरिजीरा पादुका ।

श्री केसरियानाथजी (मेवाड़)

यह स्थान जो मेवाड़की राजधानी उदयपुरसे २० कोस पर है रखभदेओ नामसे भी प्रसिद्ध है। मूलनायक श्रीऋषभदेवकी मूर्त्ति स्यामवर्ण बहुत प्राचीन और इनका अतिशय बहुत विलक्षण हैं। मन्दिरके बाहर महाराणा साहबोंके अघाट बहुतसे हैं।

पंचतीर्थी पर।

(635)

सं० १५१९ वर्षे माघ सु० १३ दिने उप० ज्ञा० श्रे० पोमा भा० पोमी सु० जावलकेन भा० गोलादे सु० जसा धना वना मना ठाकुर परवतादि कुटुंबयुतेन स्वपितृ श्रेयसे श्री धर्मनाथ बिंबं का० प्र० तपा गच्छे श्री सोम सुंदर सूरि संताने श्रीलक्ष्मी सागर सूरिभिः।

पाषाण पर।

(636)

श्री कायास्वास वासीता केवलापदाग नमो क्षमाग्रत (?) आदिनाथ प्रणमामि-- विक्रमादित्य संवत १४३१ वर्षे वैशाख सुदि अक्षय तिथौ वुध दिने चादी नाधुराल---।

(637)

श्री आदिनाथ प्रणमामि नित्यं विक्रमादित्य संवत १५७२ वैशाष सुदि ५ वार सोमवार श्री जशकराज श्री कला भार्या सोवनबाई चोजीराज यहां धुलेवा ग्राम श्री ऋषभनाथ प्रणम्य कडीआ फोईआ भार्या भरमी तस्या पवेई सा० भार्या हासलदे तस्य पगकारादेव रारगाय भ्रात वेणीदास भार्या लास्टी चाचा भार्या लीसा सकलनाथ नरपाल श्री काष्ठा संघ----श्री ऋषभनाथजी श्री नाभिराज कुष श्री तां-री कुल — —।

(638)

संवत १४४३ वै० शु० १५ पूर्णिमा तिथौ रविवासरे बृहत्खरतर गच्छे श्री जिन भक्ति सूरि पट्टालंकार भट्टारक श्री १०५ श्री जिनलाभ सूरिभिः।-- श्री राम विजयादी प्रमुखे सहूक -- आदेशात् सनीपुर - श्री ऋषभदेवजी --।

सरस्वतीजी महादेवजी के चरण चौकी पर।

(639)

संवत १६७६ वर्षे मा० सुद० १३ --।

मरुदेवी माताजीके हस्ति पर।

(640)

संवत १७११ वर्षे वैशाष सुदि ३ सोमे श्री मूलसंघे सरस्वति गच्छे वलात्कारगणे श्री कुं --।

(641)

संवत १७३४ व० माघ मासे शुक्लपक्षे - तिथौ भृगुवासरे श्री मूलसंघ काष्ठासंघ भट्टारक श्री रामसेनोन्वये तदाम्नाये भ० श्री विश्व भूषण भ० यशः कीर्त्ति भ० श्री त्रिभुवन कीर्त्ति --।

(642)

संवत १७४६ वर्षे फागुण सु० ५ सोमे श्री मूलसंघ सरस्वति गच्छे वलात्कार गणे श्री श्री कुंदकुंदाचार्यन्वये भट्टारक श्री सकल कीर्त्ति स्तदन्तर भट्टारक श्री दामकीर्त्ति --।

(643)

संवत १७६५ वर्षे माघ मासे कृष्णपक्षे पंचमी तिथौ सोमवासरे भट्टारक श्री विजय रत्न केश्वर तपागच्छे काष्ठासंघे श्रा० पु० दे० वृ० शा० मुहता गोत्रे मुहताजी श्रीरामचंद्र जी तस्यभार्या बाई सूर्यदेवि तस्यात्मज मुहताजी श्री सोभाग चंद्रजी मुहताजी श्री लालु जी भाई मुहताजी श्री हरजीजी श्रीपार्श्वनाथ जिन विंबं स्थापितं।

श्री जगवल्लभ पार्श्वनाथ प्रशस्ति।

(644)

॥ ॐ ॥ प्रणम्य परया भक्त्या पद्मावत्याः पदाम्बुजं। प्रशस्तिर्लिख्यते पुण्या कवि-केशर कीर्त्तिना ॥ १ ॥ श्रीअश्वसेन कुल पुष्पक रथञ्च भानुः। वामांग मानस विकासन राजहंसः ॥ श्रीपार्श्वनाथ पुरुषोत्तम एष भाति। धुलेव मंडनकरा करूणा समुद्रः ॥ २ ॥ श्री मज्जगत्सिंह महीश राज्ये। प्राज्यो गुणै र्जात ईहालयोयं ॥ आपुष्पदन्त स्थिर-तामुपैतु। संपश्यतां सर्व सुख प्रदाता ॥ ३ ॥

दोहा। सुर मन्दिर कारक सुखद सुमतिचंद महा साधः। तपे गच्छमें तप जप तणो उयत उदधी अगाधः ॥ ४ ॥ पुन्यथाने श्रीपार्श्वनो पुहवी परगट कीधः। खेमतणो मन षा तिसु लाहो भवनो लीध ॥ ५ ॥ राजमान मुहता रतन चातुर लषमी चंद। उच्छव किधा अति घणा आणिमन आनन्द ॥६॥ दिल सुष गोकल दासरे कीध प्रतिष्ठा पास। सारे ही प्रगटयो सही जगतिमें जसवास ॥ ७ ॥ सकल संघ हरषित हूओ निरमल रविजिन नाम राषो मुनि महंत सरस करता पुण्य सकाम ॥ ८ ॥

कवित्त। सांतिदास सचितसंत दावडा लषमी चंदहः। संघ मनुष्य सिरदार सहस किरण सुषके कंदहः ॥ वल्लभ दोसी वीर धीर जिन धर्म धुरंधरः। मुलचंद गुण मूलहीर धाया उर गुणहरः ॥ सकल संघ सानिध करः सुमतिचंद महासाधः। पास सदन कियो प्रगट

निश्चल रहो निरवाधः ॥ ९ ॥

श्लोक ॥ तद्वारेक पूज्यकृद् कृपाख्यो देवेरप्रविलग्न विचित्रः पूजावतेस्मै प्रविल लिखावे संघेन सत्सौम्य गुणान्वितेन ॥ १० ॥ गजधर सकल सुज्ञान धराहरी कीधो गुणहेर । रच्योविंव जिनराजको करुणा वंत कुवेरः ॥ ११ ॥ आर्या । शशीव सुख राज वर्षे । माधव मासे वलक्ष पक्षे च । पंचम्यां भृगुवारे हि कृता प्रतिष्ठा जिनेशस्य ॥ १२ ॥ महा-गिरि महा सूर्य्य शशिशेष शिवाद्यः । जगवल्लभ पार्श्वस्य तावतिच्छतु विंवकं ॥ १३ ॥

श्री संवत १८०१ शाके १६६६ प्रमिति वैशाख सुदि ५ शुक्र वासरे श्री जगवल्लभ पार्श्वनाथ विंवं प्रतिष्ठितं वृहत्तपा गच्छीय सुमतिचन्द्रगणिना कारापितं ॥ श्रीरस्तु ॥ शुभं भवतु ॥

पगलीयाजी पर ।

(645)

स्वस्ति श्री संवत १८७३ वर्षे शाके १७३९ वर्त्तमाने मासोत्तम मासे शुभकारी ज्येष्ठ-मासे शुभे शुक्लपक्षे चतुर्दशि तिथौ गुरुवासरे उपकेश ज्ञातीय वृद्धिशाखायां कोष्ठागार गोत्रे सुश्रावक पुण्य प्रभावक श्री देव गुरु भक्तिकारक श्री जिनाज्ञा प्रतिपालक साह श्री शंभूदास तत्पुत्र कुलोद्धारक कुल दीपक सिवलाल अंवाविदास तत्पुत्र दोलतराम ऋषभदास श्री उदेपूर वास्तव्य श्री तपागच्छे सकल भट्टारक शिरोमणि भट्टारक श्री श्री विजय जिनेंद्र सूरिभिः उपदेशात् पं० मोहन विजयेन श्री धुलेवानगरे ॥ भंडारी दुर्लचंद आगुंछइं ॥

दादाजी के चरण पर ।

(646)

संवत १९१२ का मिति फागुन वदि ७ तिथौ गुरु वासरे श्री धुलेवानगरे श्री क्षेम कीर्त्ति शाख्योद्भव महोपाध्याय श्री राम विजयजी गणि शिष्य महोपाध्याय शिवचंद्र

गणि शिष्य----चंद्र मुनिना शिष्य मोहनचन्द्र युतेन श्री सद्गुरु चरण कमलानि कारितानि महोत्सवं कृत्वा प्रतिष्ठापितानि स्थापितानि च वर्त्तमान श्री वृहत्खरतर गच्छ भट्टारकाज्ञयाच श्री अभयदेव सूरि जिनदत्तसूरिजिनचंद्र सूरि जिन कुशल सूरिणां चरणन्यासः।

पालिताना।

श्वेताम्बरियोंका विख्यात तीर्थ श्री शत्रुंजय (सिद्धाचल) पहाड़के नीचे यह काठियावाड़का एक प्रसिद्ध स्थान अवस्थित है।

मोती सुखियाजीका मन्दिर।

(647)

संवत १५०३ वर्षे ज्येष्ठ शु० १० प्राग्वाट ज्ञातीय श्रे० आमा भा० सेगू सुत परवतेन भा० मांई कुटुंबयुतेन स्वश्रेयोर्थं श्री श्रेयांस नाथ विंबं कारितं प्रतिष्ठितं तपा श्री जयचंद्र सूरिभिः ॥ गणवाढा वास्तव्यः।

(648)

संवत १५५८ वर्षे फागुण शुदि १२ शुक्रे श्री उकेश वंशे गांधो गोत्रे अंविका भक्त। सा० छाजू सुत सेंघा पुत्र सूरा भा० मेथाई सु० साऊंया भा० मकू नाम्न्या स्व श्रेयोर्थं श्री सुमतिनाथ विंबं कारितं प्रतिष्ठितं मलधार गच्छे श्री लक्ष्मीसागर सूरिभिः।

(649)

संवत १५७१ वर्षे माघ वदि १ सोमे वीसल नगर वास्तव्य प्राग्वाट ज्ञातीय व्य० चाहिता भा० लाली पु० व्य० नारद भार्या नारिग पु० जयवंतकेन भार्या हर्षमदे प्रमुख

परिवार युतेन स्वश्रेयोर्थं । श्री नमिनाथ चतुर्विंशति पट्टः कारितः प्रतिष्ठित तपागच्छे श्री सुमतिसाधु सूरि पट्टे परम गुरुगच्छ नायक श्री हेम विमल सूरिभिः ॥ श्री ॥

सिद्धचक्र पट्ट पर।

(650)

संवत १५५६ वर्षे आश्विन सुदि ८ बुधे श्री स्तंभ तीर्थ वास्तव्य प्राग्वाट ज्ञातीय म० वछाकेन श्री सिद्ध चक्र यंत्र कारितः।

सेठ नरसी केशवजीका मन्दिर।

(651)

संवत १६१४ वर्षे वैशाष सुदि २ बुधे प्राग्वाट ज्ञातीय दोसी देवा भार्या देमति सुत दो० वना भार्या वनादे सु० दो० कुंधजी नाम्न्या पितु श्रेयसे श्रीपार्श्वनाथ विंवं कारापितं तपागच्छाधिराज भट्टारक श्री विजयसेन सूरि शिष्य पं० धर्मविजय गणिना प्रतिष्ठितमिदं मंगलं भूयात् ॥

(652)

संवत १९२१ वर्षे शाके १७८६ प्रवर्त्तमाने माघ शुदि ७ तिथौ गुरुवासरे श्रीमदंचल गच्छे पूज भट्टारक श्री रतन सागर सूरिश्वराणामुपदेशात् श्री कच्छदेसे कोठारा नगरे ओशवंशे लघुशाषायां गांधिमोती गोत्रे सा० नायकमणजी सा० नाकनणसीं तस भार्या हीरबाई तत्सुत सेठ केशवजी तस भार्या पावी बाई (तत्पुत्र नरसी भाई नाना मना) पंचतीर्थी जिनविंवं भरापितं (अंजन शलाका करापितं) अठास गण ।

सेठ नरसीनाथाका मन्दिर ।

(653)

सं० १५३० वर्षे वैशाख शुदि १० सोमे श्री गंधारवास्तव्य श्री श्री माल ज्ञातीय व्य० साहसा भा० वाल्ही ठ० सालिग भा० आसी ठ० श्रीराज भा० हंसाई । व्य० सहिसा सुत धनदत्त भा० हर्षाई पते सात्म श्रेयोर्थं आदिनाथ विंबं कारितं प्रतिष्ठितं श्री वृहत्तपा पक्षे श्री विजयरत्न सूरिभिः ॥ श्री ॥

(654)

सं० १९२१ वर्षे माघ सुदि ७ गुरौ श्रीमदंचलगच्छे पूज भट्टारक श्री रत्न सागर सूरी श्वराणां सदुपदेशात् श्री कच्छदेशे श्री नलिनपुर वास्तव्य । ओश वंशे लघुशाखायां नागडा गोत्रे सेठ होरजी नरसी तद्भार्या पूरबाईना पुण्यार्थे श्री पार्श्वनाथ विंबं कारितं सकल संघेन प्रतिष्ठितं ।

(655)

सं० १९२१ वर्षेमाघ सुदि७गुरौ श्री मदंचल गच्छे पूज भट्टारक श्री रत्न सागर सूरीणां सदुपदेशात् श्री कच्छदेशे श्री नलिन पुर वास्तव्य । ओशवंशे लघुशाखायां नागडा गोत्रे सा० श्री राघव लषमण तद्भार्या देमतबाई तत्पुत्र सा० अभयचंदेन पुन्यार्थं शांतिनाथ विंबं कारितं सकल संघेन प्रतिष्ठितं ॥

सेठ कस्तुरचन्दजी का मन्दिर

(656)

संवत १६९३ वर्षे वईशाष सुदि ६ गिरौ वास्तव्य श्रीपत्तन नगरे ओसवाल ज्ञातीय वृद्ध शाषायां सोनी तेजपाल सुत सोनी विद्याधर सुत सोनी रामजी भार्या बाई अजाई

सुत सोनी वमलदास सोनी धर्मदास सोनी रूपचन्द पुत्री वाई थोत्ति एतेन श्री विजयनाथस्य विंवं कारापितं श्री तपगच्छाधिराज श्री विजयदेव सूरि राज्ये प्रतिष्ठितं आचार्य श्री विजयसिंह सूरिभिः।

श्री गौडी पार्श्वनाथजी का मन्दिर।

(657)

सं० १३८३ वैसाख वदि ७ सोमे पल्लिवाल पदम भा० कील्हण देवि श्रेयसे सुत कीकमेन श्री महावीर विंवं कारितं प्रति०

(658)

सं० १४८६ वर्षे ज्येष्ठ सुदि १३ नाहर गोत्रे सं। आसो सुतेन देवाकेन स्वबांधव सहजा हरिचन्द पत्ति चेता-श्रेयो निमित्तं श्री विमलनाथ विंवं कारापितं प्र० श्री हेम हंस सूरिभिः।

(659)

सं० १५०५ वर्षे माघ सुदि १० रवौ उकेश वंशे मीठडीआ सा० साईआ भार्या सिरीआदे पुत्र सा० भोला सा सुश्रावकेण भार्या कन्हाई लघु भ्रातृ सा० महिराज हरराज पच राज भ्रातृव्य सा० सिरिपति प्रमुख समस्त कुटुंब सहितेन श्री विधिपक्ष गच्छपति श्री जयकेशर सूरिणापमुदेशेन स्व श्रेयोर्थं श्री सुविधिनाथ विंवं प्रतिष्ठितं श्री संघेन॥ आचन्द्रार्कं विजयतां॥

(660)

सं० १५१५ वर्षे माह शुदि ५ शनौ प्राग्वाट ज्ञा० म० राउल भा० राउलदे द्वितीया हांसलदे सु० मूलू भा० अरघू सु० भोजा हासा राजा भा० भकू सु० हीरामाणिक हरदास

युतेन स्वपूर्विज पितृ श्रेयोर्थं श्री शांतिनाथ विंवं कारितं प्रतिष्ठितं आगमगच्छे श्री श्री पाद प्रभ सूरिभिः सहयाला वास्तव्यः ।

(661)

सं० १५१९ वर्षे ज्येष्ठ वदि ९ शनौ प्रा० सा० काला भा० माल्हणदे पुत्र स० अर्जुनेन भा० देऊ भ्रातृ सं० भीम भा० देमति सुति हरपाल भा० टमकू युतेन स्व श्रेयसे श्री वासु पूज्य विंवं का० प्र० श्री रत्नसिंह सूरिपट्टे श्री उदय वल्लभ सूरिभिः ।

(662)

संवत १५२८ वर्षे वैशाष वदि ११ रवौ श्री उकेश वंशे सा० चाचा भा० मायरि सुत राजाकेन भार्या वरजू सहितेन श्री सुविधिनाथ विंवं कारापितं प्रतिष्ठितं श्री जिनहर्ष सूरिभिः ।

(663)

सं० १५२९ वर्षे फा० वदि ३ सोमे स० वाछा भा० राजू सु० महीपालेन भा० अहवदे पुत्र वसुपालादि युतेन भा० सपूरो श्रेयोर्थं श्री मुनि सुव्रतनाथ विंवं कारितं प्र० तपा गच्छेश श्री लक्ष्मी सागर सूरिभिः ॥ श्री ॥

(664)

संवत १५३० वर्षे माघ शुदि १३ रवौ श्रीश्री वंशे श्रे० देवा भा० पाचू पु० श्रे० हापा भा० पुहती पु० श्रे० महिराज सुश्रावकेण भा० मातर सहितेन पितृ श्रेयसे श्री अंचल गच्छेश जय केसरि सूरिणामुपदेशेन श्री सुमतिनाथ विंवं कारितं प्र० श्री संघेन ।

(665)

सं० १५३१ वर्षे माघ सुदि ३ सोमे श्री अंचल गच्छेश श्रीजय केशर सूरिणामुपदेशेन उएशवंशे स० जहता भार्या जहतादे पुत्र माईया सुश्रावकेण रजाई भार्या युतेन स्वश्रेयसे श्री अजितनाथ बिंवं कारितं प्रतिष्ठितं सु---।

(666)

संवत १५३९ वर्षे वैशाख सुदि १० गुरौ श्रीश्री वंशे ॥ श्रे० गुणीया भार्या तेजू पुत्र अमरा सुश्रावकेन भार्या अमरादे भातृ रत्ना सहितेन पितुः पुण्यार्थं श्री अंचल गच्छेश श्रीजय केसरि सूरिणामुपदेशेन वासु पूज्य बिंवं का० प्रतिष्ठितं ॥ श्री ॥

(667)

सं० १५६६ वर्षे माह वदि ६ दिने प्राग्वाट ६ ज्ञातीय पार विलाईआ भा० हेमाई सुत देवदास भा० देवलदे सहितेन श्री चंद्रप्रभ स्वामि बिंवं कारितं प्रतिष्ठितं द्विवंदनीक गच्छे भ० श्री सिद्धि सूरीणां पट्टे श्रीश्री कक्कसूरिभिः कालू-र ग्रामे ॥

(668)

सं० १५८३ वर्षे वैशाष सुदि ३ दिने उसवाल ज्ञाति मं० वानर भा० रहो पु० मं० नाकर मं० भाजो मं० ना० भा० हर्षादे पु० पघु वनु भोजा भार्या भवलादे एवं कुटुंब सहितैं स्वश्रेयोर्थं सुविधिनाथ बिं० कारितं प्रति० द्विवंदणीक ग० भ० श्री देव गुप्त सूरिभिः। भारठा ग्रामे।

(669)

सं० १६९४ व० माघ सुदि ६ गुरौ देवक पत्तन वास्तव्य उ० ज्ञा० वृद्ध सा० जसमाल सुत सा० राजपालेन भा० वाह पूराई प्रमुख कुटुंब युतेन श्री सुमतिनाथ बिंवं का० प्र० तप गच्छे भ० श्री विजयदेव सूरिभिः।

(670)

सं० १६९४ व० माघ सुदि ६ गुरौ देवक पत्तन वास्तव्य उकेश ज्ञातीय वृद्ध शाषायां सा० राजपाल तद्भार्या बा० पूराई सुत सा० वीरपाल नाम्न्या श्री संभव बिंवं प्र० तपा गच्छे श्री विजयदेव सूरिभिः।

यति कर्म्मचन्द हेमचन्दजी का मन्दिर।

(671)

संवत १५५८ वर्षे चैत्र वदि १३ सोमे उपकेश ज्ञा० वर्द्धन गोत्रे श्रे० वना भार्या वनादे सुत श्रे० जिणदास केन भार्या आलणदे पुत्र राजा सांढादि कुटुंब युतेन श्री शितलनाथ बिंवं का० प्र० पल्लीवाल गच्छे श्रीनन्न सूरिपट्टे श्री उजोयण सूरिभिः।

(672)

संवत १५५९ वर्षे वैशाष वदि ११ शुक्रे उपकेश ज्ञातौ पीहरेचा गोत्रे सा-गोवल पु० सा--भा० धारू पु० साह नर्वदेन भा० सो भादे पु० जावड। भा० चड---पितुः श्रे० श्री मुनि सुव्रत बि० का० प्र० श्री उपकेश-श्री कक्क सूरिभिः॥ श्री कुक्कुदाचार्य संताने॥

गांव मन्दिर बड़ा।

(673)

सं० १५०७ वर्षे माघ सुदि १३ शुक्रे श्री श्रीमाल वंशे व्य० जीदा १ पुत्र व्य० जेसा-णंद २ पु० व्य० आसपाल ३ पु० व्य० अभयपाल ४ पु० व्य० वांका ५ पु० व्य० श्री वाउढि ६ पु० व्य० अणंत ७ पु० व्य० सरजा ८ पु० व्य० धींधा ९ पु० व्य० राजा १० पु० व्य० देपाल ११

पु० वसनाना १२ पु० व्य० राम १३ पुत्र व्य० भीना भार्या मांकू पुत्र वसाहर रयणायर सुश्रावकेण भा० गउरी पु० भूंभव पौत्र लाडण वरदे भात समधरीसायर भ्रात व्यसगरा करणसी– सारंग वीका प्रमुख सर्व कुटुंब सहितेन श्री अंचल गच्छे श्री गच्छेश श्री जय केसरि सूरिणामुपदेशात् स्व श्रेयसे श्री शांतिनाथ विंवं कारितं प्रतिष्ठितं श्री संघेन श्री भवंतु ॥

(674)

सं० १५३१ वर्षे श्री अंचल गच्छेश श्रीजय केसरि सूरीणामुपदेशेन श्री श्री माल ज्ञातीय दो० मोटा भा० रत्नु पु० वीरा भा० वानू पु० लषा सुश्रावकेन भगिनी चमकू सहितेन श्री शांतिनाथ विंवं स्वश्रेयोर्थं कारितं श्री संघ प्रतिष्ठितं ॥

(675)

सं० १५४८ वर्षे कातिक सुदि ११ गुरौ श्री श्रीमाल ज्ञातीय धामी गोवल भा० आपू सु० वावा भा० पोमी सु० गणपति स्वश्रेयसे श्री चन्द्रप्रभ स्वामि वि० का० प्र० चैत्र गच्छे श्री सोमदेव सूरि प्रतिष्ठितं ।

(676)

सं० १५४९ वर्षे वै० सु० १० शु० श्री उ० ज्ञा० पीहरेवा गोत्र साह भावड भा० भरमादे आत्मश्रेयोर्थं श्री जीवित स्वामी श्री सुविधिनाथ विंवं कारापितं प्रतिष्ठितं श्री उसवाल गच्छे श्री कक्क सूरि पट्टे श्री देव गुप्त सूरिभिः ॥

(677)

संवत १५७२ वर्षे वैशाष सुदि १३ सोमे श्री श्री प्राग्वाट ज्ञातीय दोसी सहिजा सुत दो० भरणा भार्या कूयटि सुत दोसी वहु भार्या वल्हादे तेन आत्म पितृमातृणां श्रेयसे श्री

संभवनाथस्य चतुर्विंशति पट्टः कारापितः श्री नागेन्द्र गच्छे भ० श्रीगुणरत्न सूरि पट्टे आचार्य श्री गुण वर्द्धन सूरिभिः प्रतिष्ठितं श्री जीर्ण दूर्ग वास्तव्य ॥

(678)

सं० १६०३ वर्षे चैत्रवदि १३ रवौ उ० टप गोत्रे---क सा० नरपाल भा० रंगाई पु० महिराज सोहराज धनराज श्री महिराज भार्या धनादे पु० धनासुतेन स्वपुण्यार्थं श्री पार्श्वनाथ विंबं कारापितं प्रतिष्ठितं श्री संडेर गच्छे भ० श्री यशोभद्र सूरि संताने श्री शांति सूरिभिः।

(679)

सं० १९२१ व० माह सु० ७ गुरुवासरे श्री जिनविंबं प्र० सा० जीवा अषाजी ----।

दिगम्बरी पंचायती मन्दिर।

(680)

संवत १५२३ वर्षे वैशाख सुदि तेरस गुरौ श्रीमूलसंघे सरस्वति गच्छे बलात्कार गणे भट्टारक श्रीविद्यानंदि गुरूपदेशात् ब्रह्मपद्माकर कारापिता।

श्री शत्रुञ्जय तीर्थपर टोकोंमें पञ्चतीर्थीयों पर।

साकरचंद प्रेमचन्द टोंक।

(681)

सं० १५०८ वर्षे मार्गशीर्ष वदि २ बुधे श्री दूताड़ गोत्रे सा० भूना भार्या मोल्ही एतयोः पुत्रेण भा० नाजिग नान्याः पित्रो पु० श्रीचंद्रप्रभ विंबं का० प्र० श्री वृहद्ग गच्छे श्री रत्नप्रभ सूरि पट्टे श्री महेंद्र सूरिभिः ॥

प्रेमा भाई हेमा भाई टोंक।

(682)

सं० १५३२ वर्षे ज्येष्ठ वदि १३ बुधे आसापद आ (?) श्री श्री माल ज्ञातीय सा० मेघा सुत सा० कर्म्मण भार्या कर्म्मादे पुत्र व्य० समधर भार्या वईजू पुत्र व्य० सहिता व्य० सहिता व्य० सिहदत्त व्य० श्री पति आत्म श्रेयसे सा० सहिसाकेन भार्या अमरादे ---- युतेन श्री आदिनाथ बिंबं कारितं प्रतिष्ठितश्च वृद्धतपा पक्षे श्री श्री उदय सागर सूरिभिः ॥ श्री ॥

प्रेमचन्द मोदी टोंक।

(683)

सं० १३६८ वर्षे श्रे० जगधर भार्या दमल पुत्र सीकतेन भार्या सहजल सहितेन- श्रेयसे श्रीशांतिनाथ बिंबं कारितं प्रतिष्ठितं श्रीगुणचंद्र सूरि शिष्यैः श्री धर्म्मदेव सूरिभिः।

(684)

सं० १३७८ प्राग्वाट ज्ञातीय ठ० वयजलदेव पुत्रिकाया वाएल -- मलधारि श्री पद्मदेव सूरि --- श्री तिलक सूरिभिः।

---

(685)

सं० १८८१ वर्षे चैत्र सुदि ६ वार रवि दिने श्री वृद्धपोसल गच्छे — श्री माली वृद्ध शाखायां सा० माणकचंद कुवेरसा -- भार्या वाई डाहीकेन श्रीसुमतिनाथजी बिंबं भरापितः श्री आणंद सोम सूरिजी प्रतिष्ठितं सुख श्रेयस्तु।

(686)

सं० १३१४ वै० सु० ३ ---विंबं का० श्री चन्द्र सूरिभिः ।

(687)

सं० १३७३ ज्ये० सु० १२ श्रे० राणिग भा० लाडी पु० महण सीहेनपिता माता श्रेयोर्थं श्री महावीर विंबं का० प्र०---- श्री सालिभद्र (?) सूरि श्री मणिभद्र सूरिभिः ।

(688)

सं० १३८७ ---श्री आदिनाथ विं० का० प्र० श्री महातिलक सूरिभिः ।

(689)

सं० १४४६ वर्षे वै० व० ३ सोमे प्रा० ज्ञा० पितृ धणसीह मातृ हांसलदे श्रेयसे सुत सादाकेन श्री अजितनाथ विंबं पंचतीर्थी का० प्र० श्री नागेन्द्र गच्छे श्री रत्नप्रभ सूरिभिः ॥ छ ॥

(690)

सं० १४६३ फा० सु० ९-- श्रीमाल -- श्री तेजपाल भा० --- श्रेयसे सुत भादाकेन श्री आदिनाथ विं० प्र० श्री जयप्रभ सूरीणामुपदेशेन ।

(691)

सं० १४८६ वर्षे --श्रीमाल -- आदिनाथ विंबं प्र० श्री नरसिंह सूरीणामुपदेशेन ।

(692)

सं० १५११ व ज्येष्ठ व० ९ रवौ उसवाल ज्ञा० म० पूना भा० मेलादे सु० वीजल भा० डाही तयो श्रेयसे भ्रातृ आसुदत्त हीराभ्यां श्री विमलनाथ विंवं का० पूर्णिमापक्षे भीम पल्लीय भट्टा० श्री जयचंद्र सूरीणामुपदेसेन प्रतिष्ठितं ॥

(693)

सं १५१९ व० फा० वा० ४ गुरु श्रीमाली ज्ञा० म० गोवा भा० नाऊ सुत जूठाकेन पितृमातृ श्रेयोर्थं श्रीधर्मनाथ विंवं का० प्र० श्रीब्रह्माणगच्छे श्री मुनि चंद्र सूरि पट्टे श्री वीर सूरिभिः ॥ वलहारि वास्तव्यः ॥ श्री ।

(694)

सं० १६८५ व० वै० सु० १५ दिने क्षत्रि रा० पुजा का ---- श्री नमिनाथ विंवं श्री विजयदेव सूरिभिः प्रतिष्ठितं ॥

(695)

सं० १७७८ व० ---- श्रीसुमतिनाथ वि० का० प्र० वि० श्रीधर्मप्रभ सूरिभिः पिप्पलगच्छे ।

सेठ वाल्हा भाई टोंक ।

(696)

संवत १५२५ वर्षे फाल्गुन सुदि ७ शनौ श्रीमूलसंघे सरस्वती गच्छे वलात्कार गणे श्री कुंदकुंदाचार्यान्वये भ० श्रीपद्मनंदि देवा तत्पदे भ० श्री सकल कीर्त्ति देवा तत्पदे

भ० श्री विमलेंद्र कीर्त्ति गुरूपदेशात् श्री शांतिनाथ हूंवड़ ज्ञातीय सा० नाडू भा० ऊंमल सु० सा० काह्ला भा० सर्मात सु० लषराज भा० अजो भा० जेसंग भा० जसमादे भा० गांगेज भा० पदमा सु० श्री राजसषवोर नित्य प्रणमंति श्रीः।

(697)

संवत १६२८ वर्षे वै० शु० १० बुधे श्रीमालज्ञातीय महषेता भा० हासी सुत मूलजी भा० अहिवदे केन श्री वासपूज्य विंवं कारापितं श्री तपा श्री हीर विजय सूरिभिः प्रतिष्ठितं शुभं भवतु ॥ छ ॥

मोती साह टोंक।

(698)

सं० १५०३ ज्येष्ठ शु० ९ प्राग्वाट स० कापा भार्या हासलदे पुत्र झाझणेन भार्या नागलदे पुत्र मुकुंद नारद भ्रातृ घना श्रेयसे जीवादि कुटुम्ब युतेन निज पितृ श्रेयसे श्री नमिनाथ विंवं क० प्र० तपा गच्छे श्री जयचन्द्र सूरि गुरुभिः।

मूल टोंक।*

(699)

सं० १९९३ ना मिती ज्येष्ठ वदो १२ गुरुवासरे श्रीमकसुदाबाद वास्तव्य ओसवाल जातीय वृद्ध शाषायां नाहार गोत्रीय सा० खड्ग सिंहजी तत्पुत्र सा उत्तम चंदजी तत् भार्या वीवी मया कुंवर श्री सिद्धाचलोपरि श्री ऋषभदेवजी परी प्राशाद मध्ये

---

* श्री आदिश्वर भगवानके मूल मंदिरके ऊपर संग्रह कर्त्ताकी वृद्ध पितामही साहिबाकी प्रतिष्ठित यह आलेख का लेख है। इस महान तीर्थके और लेख प्रशस्ति आदि पश्चात प्रकाशित होगा।

आलोषे प्रतिमा बिंबि मया कुंवर स्वहस्ते स्थापितं प्रतिष्ठितं च श्री वृहत खरतर गच्छे भ० । यं । जु । श्री जिन सौभाग्य सूरि जी विजै राज्ये पं० देवदत्त जी तत् शि० पं० हीरा चंद्रेण प्रतिष्ठितं च ॥ श्री ॥

रैनपूर तीर्थ ।

मारवाड़के पंचतीर्थीमें रैनपूर तीर्थ नलिनीगुल्म विमानाकार तेमञ्जिला अगणित स्तम्भोंसे भरा हुआ त्रिलोक्य दीपक नामक विशाल मंदिरके कारण जगत्प्रसिद्ध है। "आबुकी कोरणी रैनपूराकी मांडनी" देखने ही योग्य है।

मंदिरकी प्रशस्ति ।

(700)

स्वस्ति श्री चतुर्मुख जिन युगादीश्वराय नमः ॥

श्रीमद्विक्रमतः १४९६ संख्य वर्षे श्री मेदपाट राजाधिराज श्री वप्प १ श्री गुहिल २ भोज ३ शील ४ कालभोज ५ भर्त्तृभट ६ सिंह ७ सहायक ८ राज्ञी सुत युतस्व सुवर्णतुला तोलक श्रीखुम्माण ९ श्रीमदल्लट १० नरवाहन ११ शक्तिकुमार १२ शुचिवर्म १३ कीर्त्ति-वर्म १४ जोगराज १५ वैरट १६ वंशपाल १७ वैरिसिंह १८ वीरसिंह १९ श्री अरिसिंह २० चोड़सिंह २१ विक्रमसिंह २२ रणसिंह २३ क्षेमसिंह २४ सामंतसिंह २५ कुमारसिंह २६ मथनसिंह २७ पद्मसिंह २८ जैत्रसिंह २९ तेजस्विसिंह ३० समरसिंह ३१ चाहूमान श्रीकोतूक नृप श्रीअल्लावदीन सुरत्राण जैत्र वप्प वंश्य श्री भुवन सिंह ३२ सुत श्रीजय सिंह ३३ मालवेश गोगादेव जैत्र श्री लक्ष्मसिंह ३४ पुत्र अजयसिंह ३५ भ्रातृ श्री अरिसिंह श्री हम्मीर ३७ श्री खेतसिंह ३८ श्री लक्षाह्वयनरेन्द्र ३९ नंदन सुवर्ण तुलादि दान पुण्य परोपकारादि सारगुण सुरद्रुम विश्राम नंदन श्रीमोकल महिपति ४० कुलकानन पंचान-

नस्य। विषम तमाभंग सारंगपुर नागपुर गागरण नराणका अजयमेरु मंडोर मंडलकर बुंदी खाटू चाट सुजानादि नानादुर्ग लीलामात्र ग्रहण प्रमाणित जित काशित्वाभिमानस्य। निज भुजोर्जित समुपार्जितानेक भद्र गजेन्द्रस्य। म्लेच्छ महीपाल व्याल चक्रवाल विदलन विहंगमेंद्रस्य। प्रचंड दोर्दंड खंडिताभिनिवेश नाना देश नरेश भाल माला लालित पादारविंदस्य। अस्खलित ललित लक्ष्मी विलास गोविंदस्य। कुनय गहन दहन दवानलायमान प्रताप व्याप पलायमान सकल बलूस प्रतिकूल क्ष्माप श्वापद वृंदस्य। प्रबल पराक्रमाकांत ढिल्लिमंडल गूर्जरत्रा सुरत्राण दत्तातपत्र प्रथित हिन्दु सुरत्राण विरुदस्य सुवर्ण सत्रागारस्य षड्दर्शन धर्माधारस्य चतुरंगवाहिनी वाहिनी पारावारस्य कीर्त्तिधर्म प्रजापालन सत्वादि गुण क्रियमान श्रीराम युधिष्ठिरादि नरेश्वरानुकारस्य राणा श्री कुंभकर्ण सर्वोर्वीपतिसार्वभौमस्य ४१ विजयमान राज्ये तस्य प्रासद पात्रेण विनय विवेक धैर्योदार्य शुभ कर्म निर्मल शीलाद्यद्भुत गुणमणिमया भरण भासुर गात्रेण श्री मदहम्मद सुरत्राण दत्त फुरमाण साधु श्रीगुणराज संघ पति साहचर्य कृताश्चर्यकारि देवालयाडंबर पुरःसर श्री शत्रुंजयादि तीर्थ यात्रेण। अजाहरी पिंडर वाटक सालेरादि बहुस्थान नवीन जैन विहार जीर्णोद्धार पद स्थापना विषम समय सत्रागार नाना प्रकार परोपकार श्री संघ सत्काराद्य गण्य पुण्य महार्य क्रयाणक पूर्यमाण भवार्णव तारण क्षम मनुष्य जन्म यान पात्रेण प्राग्वाट वंशावतंस स० सागर (मांगण) सुत स० कुरपाल भा० कामलदे पुत्र परमार्हत धरणाकेन ज्येष्ठ भ्रातृ सं० रत्ना भा० रत्नादे पुत्र सं० लाषा म(स)जा सोना सालिग स्व भा० स० धारलदे पुत्र जाज्ञा जावडानि प्रवर्द्धमान संतान युतेन राणपुर नगरे राणा श्री कुंभकर्ण नरेन्द्रेण स्वनाम्ना निवेशिते तदीय सुप्रसादादेशलस्त्रैलोक्यदीपकाभिधानः श्री चतुर्मुख युगादीश्वर विहार कारितः प्रतिष्ठितः श्रीबृहत्तपा गच्छे श्रीजगच्चंद्र सूरि श्रीदेवेंद्र सूरि संताने श्रीमत् श्रीदेवसुन्दर सूरि पट्ट प्रभाकर परम गुरु सुविहित पुरंदर गच्छाधिराज श्रीसोमसुन्दर सूरिभिः॥ कृतमिदंच सूत्रधार देपाकस्य अयं च श्रीचतुर्मुख विहारः आचंद्रार्कं नंदतात्॥ शुभं भवतु॥

पाषाण और धातुओंके मूर्त्ति पर।

(701)

सं० ११८५ चैत्र सुदि १३ श्री ब्रह्माण गच्छे श्री यशोभद्र सूरिभिः ---छ स्थाने देव सरण सुत श्रीशके ---श्री गुह -- कारिता।

(702)

संवत १२९० वर्षे माघ सुदि ५ शुक्रे श्रे० वढपाल श्रे० जगदेवाभ्यां श्रेयोर्थं पुत्र सामदेवेन भ्रातृ पून सिंह समेतेन चतुर्विंशति पट्ट कारितः प्रतिष्ठितं वृहद्गच्छीयैः श्री शांति प्रभ सूरिभिः।

(703)

संवत १४९९ वर्षे सा० साजण भार्या सिरिआदे पुत्र चांपाकेन भार्या चापल देव्यादि कुटुम्ब युतेन अनागत चतुर्विंशत्यां श्री समाधि विंबं का० प्र० तपा श्री सोम सुन्दर सूरिभिः।

(704)

संवत १५०१ ज्ये० सुदि १० प्राग्वाट व्य० करणा सुत रामाकेन भार्या तीचणि युतेन श्री क सुमतिनाथ विंबं कारितं प्र० तपा श्री सोमसुंदर शिष्य श्री मुनि सुंदर सूरिभिः।

(705)

शत्रुंजयके नक्सेके निचे।

॥ ॐ ॥ सं० १५०७ वर्षे माघ सु० १० ऊकेश वंशे स० भीला भा० देवल सुत सं० धर्मा सं० केल्हा भा० हेमादे पुत्र स० तोल्हा षांगां मोल्हा कोल्हा आल्हा साल्हादिभिः सकुटुंबैः स्वश्रेयसे श्री राणपुर महानगर त्रैलोक्य दीपकाभिधान श्री युगादि देव प्रासादे --- धन्त -- महातीर्थ शत्रुंजय श्री गिरनार तीर्थ द्वय पट्टिका कारिता प्रतिष्ठिता श्री सूरि पुरंदरैः॥ तीर्थनामुत्तमंतीर्थं नागानामुत्तमा नगः। क्षेत्राणामुत्तमं क्षेत्रं सिद्धाद्रिः श्री जिं ---मं ॥ १ श्री रुसुपूजकस्य ---।

(J06)

संवत १५३५ वर्षे फाल्गुन सुदि-- दिने श्री उसवंशे मंहोरा गोत्रे सा० लाषा पुत्र सा० वीरपाल भा० नेमलादे पुत्र सा० गयणाकेन भा० मोतादे प्रमुख युतेन माता विमलादे पुण्यार्थं श्रीचतुर्मुख देव कुलिका कारिता॥

(707)

॥ ॐ ॥ सं० १५५१ वर्षे माघ वदि २ सोमे श्री मंडपाचल वास्तव्य श्री उश वंश शृंगार सा० धर्मसुत सा० नरसिंग भा० मनकू कुक्षि संभूत सा० नरदेव भार्या सोनाई पुत्ररत्न सा० संग्रामेन कायोत्सर्गस्थ श्री आदिनाथ बिंबं कारितं। प्र० वृ० तपा श्री उदयसागर सूरिभिः स्थापित श्री चतुर्मुख प्रासादे चरण बिहारे॥ श्री॥

सहस्रकूट पर ।

(708)

सं० १५५१ व० वैशाख वदि ११ सोमे से० जावि भा० जिसमादे पु० गुणराज भा० सुगणादे पु०जगमाल भा० श्री वच्छ करावित (उत्तर तर्फ) वा० गांगादे नागरदास वा० साडापति श्री मूजा कारापिता श्रा० मीत्तवि० रामा० भा० कम ---।

(709)

संवत १५५२ व० मिगशर सुदि ९ गुरु दिने श्री पाटण वास्तव्य ओस वंस ज्ञातीय म० धणपति भा० चांपाई भाई मं० हरषा भा० कीकी पु० मं० गुणराज म० मिहपाल ॥ करावत ॥

(710)

सं० १५५६ वर्षे वै० सुदि ६ शनौ श्री स्तम्भतीर्थ वास्तव्य श्री उस वश सा० गणपति भा० गंगादे सु० सा० हराज भा० धरमादे सु० सा० रत्नसीकेन भा० कपूरा प्रमु० कुटुंब युतेन राणपुर मंडन श्री चतुर्मुख प्रासादे देव कुलिका का --- श्री उसवाल गच्छे श्री देव नाथ सूरिभिः ।

(711)

सं० १५५६ वर्षे वै० सुदि ६ शनौ श्री स्तम्भतीर्थ वास्तव्य श्री उसवंश सा० आसदे भार्या सपांह सुत सा० साजा भार्या राजी सुत सा० श्री जोगराजेन भ्रातृ सभागा स्वभार्या प्रथ० सोवती देती० सं० अखा ---सहजो सा० भाकर प्रमुख कुटुंब युतेन

स्वश्रेयसे श्री राणपुर मंडन श्री चतुर्मुख प्रासाद देव कुलिका कारिता श्री चतुर्मुख प्रासादे श्री उदय सागर सूरि श्री — ष्टि सागर सूरिणामुपदेशेन ।

(712)

संवत १५८-- वर्षे माघ सुदि १० उकेश वंशे छाजहड़ गोत्रे सा० साघ पुत्र सा० उमला भ्रातृ पुण्यार्थं श्री धर्म्मनाथ का० प्र० श्री जिन सा --- सूरिभिः ।

पूर्व सभामण्डपके खंभे पर ।

(713)

॥ॐ॥सं १६११ वर्षे वैशाख शुदि १३ दिने पात साह श्री अकबर प्रदत्त जगद्गुरु विरुद धारक परम गुरु तपा गच्छाधिराज भट्टारक श्री ६ हीर विजय सूरीणामुपदेशेन श्री राणपुर नगरे चतुर्मुख श्री धरण विहार श्री महम्मदावाद नगर निकट वच्युंसमापुर वास्तव्य प्राग्वाट ज्ञातीय सा० रायमल भार्या वरजू भार्या सुरूपदे तत्पुत्र खेता सा० नायकाभ्यां भ्रावरधादि कुटुंब युताभ्यां पूर्व दिग् प्रतोल्या मेघनादाभिधो मंडपः कारितः स्व श्रेयोर्थं ॥ सूत्रधार समल मंडप रिवनाद विरचितः ॥

दूसरे आंगनमें ।

(714)

॥ ॐ ॥ संवत १६४७ वर्षे फाल्गुन मासे शुक्लपक्षा पंचम्यां तिथौ गुरुवासरे श्री तपा गच्छाधिराज पातसाह श्री अकबरदत्त जगद् गुरु विरुद धारक भट्टारिक श्री श्री श्री ५ हीर विजय सूरीणामुपदेशेन चतुर्मुख श्री धरण विहारे प्राग्वाट ज्ञातीय सुश्रावक सा०

खेता नायकेन वद्धों पुत्र यशवंतादि कुटुम्बयुतेन अष्टचत्वारिंशत् (४८) प्रमाणानि सुवर्ण नाणकानि मुक्तानि पूर्व दिक्सत्क प्रतोली निमित्तमिति श्री अहमदाबाद पार्श्वे उसमा पुरतः ॥ श्रीरस्तु ॥

(715)

नमः सिद्ध श्री गणेशाय प्रसादात्। संवत १७२८ वर्षे शाके १५९४ वर्त्तमाने जेठ सुदि ११ सोम जावर नगरे काठुड गोत्रे दोसी श्री सूजा भार्या कथनादे सुत गोकलदास भार्या गम्भीरदे अमोलिकादे सुत रणछोड़ हरीदास प्रतिष्ठित श्री संडेरगच्छे भट्टारक श्री देवसुंदर सूरि प्रतिष्टित उपाध्याय श्री—न सुंदरजी चेला रतनसी

(716 j

सं० १७२८ मा० संडेरगच्छे उ० श्री जनसुंदर सूरि चेला रतन राणकपूर महानगर त्रैलोक्य दीपकाभिधाने ---।

(717)

संवत् १९०३ वर्षे वैशाख सुदि ११ गुरौ दिने पूज्य परमपूज्य भट्टारक श्री श्री कक्क सूरिभिः गण २१ सहिता यात्रा सफलो कृता श्री कवल गच्छे लि० पं० शिवसुंदर मुनिना ॥ श्री रस्तु ॥

(718)

संवत् १९०३ वर्षे वैशाख सुदि ११ श्री जिनेश्वराणां चरणेषु। पं० शिवसुंदरः समागतः।

सादडि ।

यह ग्राम रैनपुरसे ३ कोस पर है ।

(719)

स्वस्ति श्री ऋद्धि वृद्धि जया मंगलाभ्युदय श्री- अथ श्रीनृ—विक्रमादित्य समयात्-- १६४८ वर्षे वैशाख मासे कृष्णपक्षे अष्टम्यां तिथौ लामदासार गंगाजल निर्मलायां श्री उसवाल ज्ञातौ कावेडिया गोत्रे साह श्री भारमल गृहे भार्या बहू श्री मेवाडी --- तत्पुत्र साह श्री तारा चंदजी स्वर्गारूढो जातः तत्र बहू श्री तारादे १ बह श्री त्रिभवणदे २ बहू श्री असढवदे ३ बहू श्री सोभागदे ४ सहगत ---।

नाकोडा ।

मारवाड़ के मालानी-परगने के नगरके पास पहाड़ोंके बीच यह एक प्राचीन स्थान है ।

(720)

संवत १६२१ --- पार्श्वनाथ जिन चैत्ये चतुष्किका कारापित श्रावक संघेन ।

(721)

-- संवत १६३८ आशाढ़ सुदि २ गुरुवार ---।

(722)

संवत १६४२ भाद्रपद सुदि १२ सोमवार ---राउल श्री मेघराजजी विजय राज्ये --।

(723)

संवत १६६६ भाद्रपद शुक्र पक्ष तिथि द्वितीया दिने शुक्रवासरे वीरमपुर श्री शांति-नाथ प्रासाद भूमि गृहे श्री खरतरगच्छे श्री जिन चंद्र सूरि विजयाधिराज आचार्य श्री सिंह सुरि राज्ये श्री संघेन लिखितं।

(724)

उपाध्याय श्री ५ देवशेखर विजय राज्ये ॥

॥ ॐ ॥ सं० १६ असाढ़ आदि ६७ वर्षे भाद्रपद शुक्र पक्षे श्री नवमि दिने शुक्रवासरे श्री वीरमपुरवरे श्री पार्श्वनाथ श्री महावीर स्वामी श्री पल्लीवाल गच्छे भट्टारिक श्री यशोदेव सूरि विजय राज्ये राउल श्री तेजसीजी विजय राज्ये कारित श्री संघेन पंडित श्री सुमति शेखरेण लिपीकृतं सुत्रधार दामा तत्पुत्र मना धना वरजांगेन कृतं ॥ भ्रात्रीज सामा मेघा कला पुत्र कल्याण ॥ भानेज नासण श्री पार्श्वनाथ श्री महावीरजी रक्षा शुभं भवतु ---

(725)

संवत् १६६८ वर्षे द्वितीय आसाढ़ शुक्र ६ शुक्रवासरे उत्तरा फाल्गुनी नक्षत्रे श्री तेजसिंहजी द्राज्ये श्रीतपागच्छे भट्टारक श्री विजय सेन सूरि विजय राज्ये आचार्य श्री विजयदेव सूरि विजय राज्ये।

(726)

स्वस्ति श्री तथा मंगलमभ्युदयश्च। संवत १६७८ वर्षे शाके १५४४ प्रवर्त्तमान द्वितीय आसाढ़ सुदि २ दिने रविवारे रावल श्री जगमालजी विजय राज्ये श्री पल्लिकीय

गच्छे भट्टारक श्री यशोदेव सूरिजी विजयमाने श्री महावीर चैत्ये श्री संघेन चतुष्किका कारिता श्री नाकोड़ा पार्श्वनाथ प्रसादात् शुभं भवतु। उपाध्याय श्री कनक शेखर शिष्य पं० सुमति शेखरेण लिखित श्री छाजहड़ दीव सेखाजी संघेन कारापिता सूत्र धारः ऊजल भातृ झाझा घडिता भवन कथरा- -।

छत्रीमें।

(727)

॥ ॐ ॥ श्रीमत् श्री जिन भद्र सूरि भृत्याणां बुजाग्रोदया। धन्याचार्यपदावदात-वदिताः श्री कीर्त्तिरत्नाह्वया ॥ नम्रा नम्र सरोज रश्मणि विभा प्रोच्छासितां हि द्वया। राजा नन्द करा जयंतु विलसत् श्री शंखवालान्वया ॥ - - - - - -

---

बालोतरा।

श्री शीतलनाथजी का मंदिर

धातु मूर्त्तियों पर।

(728)

सं० १२३४ ज्येष्ठ सुदि ११ सा० जणदेव आर्या जेउत पुत्र वीरा देवेन भ्रात वाहड़ वीरदे श्रेयार्थमकारि प्र० देव सूरिभिः।

(729)

सं० १४०१ वैशाष ४ श्री आदित्य नाग गोत्रे सघ० कुलियात्मजा सा० झाम पुत्रेण स - - पुत्र श्रेयसे श्री शांति विंवं कारितं प्रति० श्री कक्क सूरिभिः।

(730)

सं० १५०१ वर्षे माघ वदि ६ बुधे उपकेश ज्ञातौ आदिणाग गोत्रे सा० कालू पु० वील्ला भार्या देवा आत्म श्रेयसे श्री श्रेयांस विंवं कारितं श्री उकेश गच्छे ककुदाचार्य संताने प्रतिष्ठितं श्री कुंकुम सूरिभिः।

(731)

सं० १५०४ वैशाख सु० ७ दिने श्री उकेश वंशे सा० डीडा पुत्र सा० नाथ - - - सहितेन स्वपुण्यार्थं श्री पार्श्व जिन विंवं का प्र० श्री खरतर गच्छे श्री जिन भद्र सूरिभिः।

(732)

सं० १५०९ वर्षे कार्तिक सु० १३ गुरौ उपकेश वंशे बहरा गोत्रे सा० - - - पुत्र हरिपाल भार्या राजलदे पुत्र सा० धरमा भार्या धनाई पुत्र सा० सहजाकेन स्वपितृ पुण्यार्थं श्री वासुपूज्य विंवं कारितं। श्री खरतर गच्छे श्री जिनराज सूरि पट्टे श्री जिन भद्र सूरि युगे प्रधान गुरुभिः प्रतिष्ठितः।

(733)

सं० १५०९ वर्षे - - उपकेश वंशे बहरा गोत्रे सा० - - - श्री सुमतिनाथ विंवं कारिता श्री खरतर गच्छे श्री जिनराज सूरि पट्टे श्री जिन भद्र सूरिभिः प्रतिष्ठितं।

(734)

सं० १५२५ वर्षे मार्ग शीर्ष बदि ९ शुक्रे श्री उपकेश ज्ञातीय श्री दूगड़ गोत्रे मं० पनरपास पु० वछराज भा० कम्मी पुत्र सारंग सुदय वच्छाभ्यां पितु पुण्यार्थं श्री कुंथु-नाथ विंवं कारिता प्र० श्री रुद्र पल्लीय गच्छे श्री देवसुंदर सूरि पट्टे भ० श्री सोम सुंदर सूरिभिः।

(735)

सं० १५३७ वर्षे वैषाख सुदि ७ दिने श्री उपकेश वंशे व - रा गोत्रे अभयसिंह संताने सा० कुता भार्या लषमादे सा० डाहृत्थ श्रावकेण भा० पूराई पुत्र मरा जीवा देवादियुतेन श्री धर्मनाथ विंवं का० श्री खरतर गच्छे श्री जिनभद्र सूरि पट्टे श्री जिनचंद्र सूरि पट्टे श्री जिन समुद्र सूरिभिः प्रतिष्ठितः॥

भावहर्ष गच्छके उपासरेमें केशरियानाथजी का देरासर।

(736)

॥ ॐ ॥ सं० १०९—वैशाख वदि ५ - - - - प्रतिमा कारितेति।

(737)

सं० १५३३ श्री माल फोफलिया गोत्रे सा० बूहड़ भा० नापाई पुत्र बुद्दाकेन भा० - - कुटुंबेन युतेन श्रीविमलनाथ विंवं का० प्र० श्रीधर्म घोष गच्छे श्री पद्मानन्द सूरि श्री -।

(738)

सं० १७१८ सा० रामजा सुत तेजसी श्री आदिनाथ विंवं का० प्र० श्री विजय गच्छे आपणा सुमति सागर सूरिभिः आचार्य श्री - - -।

वाड़मेड़ ।

गोपोंका उपासरा ।

धातुके मूर्त्तियों पर ।

(739)

स० १५२७ व० माह शु० १३ उ० सा० साल्हा भा० ल्होसलदे पुत्र सा० गुण दत्तेन भा० गेलमदे पु० तिहणा गोपादि कु० युतेन श्रीसुमतिनाथ विंवं का० प्र० तपागच्छे श्री सोम सुन्दर सूरि संताने श्री लक्ष्मीसागर सूरिभिः ॥ श्री ॥

(740)

सं० १५८० वर्षे वैशाष सुदि १३ शुक्रे श्री श्री माल ज्ञा० म० डोरा भा० सषो सु० सं० हेमा भा० हमीरदे मं० भषाकेन भा० वमी सु० अमरा युतेन स्वश्रेयसे श्री सुविधिनाथ विंवं श्री पू० श्री पुण्य रत्न सूरि पदे श्री सुमति रत्न सूरिणामुपदेशेन कारितं प्रतिष्ठितंच विधिना ॥ श्री ॥

यति इंद्रचन्दजीका उपासरा ।

(741)

सं० १५१२ वर्षे वैशाष सुदि ५ श्री श्रीमाल ज्ञा० श्रे० सहसा भा० झोली पुत्र जिन-दास महाजल युतेन स्वश्रेयसे श्री कुंथुनाथ विंवं का० आगम गच्छे श्री हेम रत्न सूरिणा मुपदेशेन प्रतिष्ठितः ॥

(742)

सं० १५१४ मा-शु० - प्राग्वाट ज्ञा० रूल्हाकेन भा० वजू सुत सा० वीरा माणिक

बछादि कुटुंब युतेन पितृव्य सा० चांपा श्रेयोर्थं सुमति नाथ विंबं कारितं प्र० तपा श्री सोम सुन्दर सूरि श्री मुनि सुन्दर सूरि पट्टे श्री रत्न शेखर सूरिभिः।

बडा मन्दिर श्रीपार्श्वनाथजीका।

सभा मण्डप।

(743)

ॐ नमो भगवते श्री पार्श्वनाथाय नमः॥ संवत १८५९ वर्षे माह सुदि ५ शुक्र पक्ष प्रतिपदा तिथौ सोम वासरे राठउड़ वंशे राउल श्री उदयसिंह श्री वाक् पत्राका नगर - - - राज्ये कृपा - श्री त्रां - कीय सहिभिः॥ श्री विधि पक्ष मुख्याभिधान युग प्रधान श्री पता श्री धर्म्म मूर्त्ति सूरि अंचल गच्छीय समस्त श्री संघमें शांति श्रेयोर्थं श्री पार्श्वनाथ प्रासाद कारितः।

पञ्च तीर्थियों पर।

(744)

सं० १९०३ माह बदि ५ शुक्रे श्री उदयपुर नगर वास्तव्य श्री सहस्र फणा पार्श्व-नाथजीकी घरिसातांता संघ समस्त मीणक बाई श्री शांतिनाथ पञ्च तीर्थं कारापितं तपा गच्छे पं० रूप विजय गणिभिः प्रतिष्ठितं च।

दुसरा मंदिर।

(775)

संवत १५४० वर्षे जेष्ठ सुदि १० सोमे श्री श्री माल ज्ञातीय पितामह रा० वस्ता पितामही कोल्हणदे सुत पितृ सं० पचा मातृ राजूश्रेयोर्थं सुत सं० सहसा सागा सहदे

घरणा एतै श्री आदिनाथ मुख्यश्चतुर्विंशति पट्टः कारितः पुनिम पक्षे साधु रत्न सूरिणामुपदेशेन प्रतिष्ठित शंडलि वास्तव्यः।

(746)

सं० १५२० श्री मूल संघेन भट्टारक श्री विजय कीर्त्ति श्रे०

सभा मंडप।

(747)

॥ ॐ ॥ संवत् १६७६ वर्षे माघ सुद १५ रा त्र वासरे खरतर गच्छ भट्टारक श्री जिन रत्न - - पुष्य नक्षत्रैः राऊत श्री उदयसिंहजी विसरि विजय राज्ये जयराज्ये॥ श्री सुमतिनाथ रउ नवत्रु कीउ श्री संघ करावउ सूत्रधार पीसा पुत्र नता नवबु कीउ। सूत्रधार नारयण नट संघ धन।

(748)

सं० १९२८ वर्षे भद्रपद कृष्णापक्ष ७ बुध - - वृहत्खरतर गच्छे भट्टारक श्रीमगत सुर रावलजी श्रा वाकीदासजी - -। जुहारसिंग विजय राजे श्री सुमतनाथजी-शिणगार कीधी - -।

(749)

॥ ॐ ॥ संवत १३५२ वैशाख सुदि ४ श्री वाहडमेरौ महाराज कुल श्री सामंत सिंह देव कल्याण विजय राज्ये तन्नियुक्त श्री करण मं० वीरामेल वेलाउल भा० मिगन प्रमुख बोधं अक्षराणि प्रयच्छति यथा। श्री आदिनाथ मध्ये संविष्ठमान श्री विघ्नमर्दन

क्षेत्रपाल श्रीचउंड राज देवयो उभय मार्गीय समायात सार्थ उष्ट्र १० वृष २० उभया-दपि उद्धं सार्थं प्रति द्वयो देवयोः पाइला पदे प्रियदश विशोप का० अर्द्धोर्द्धन ग्रहीत-व्याः । असौ लागो महाजनेन संमतः ॥ यथोक्तं बहुभिर्वसुधा भुक्ता राजभिः सगरा-दिभिः । यस्य यस्य यदा भूमी तस्य तस्य तदाफलं ॥ १ ॥ छ ॥

मेडता

यह भी मारवाड़का एक प्राचीन नगर है।

श्री आदिनाथजी का मंदिर—डागियोंका मुहल्ला।

(750)

